यजुः, [स्] क्ली, (इज्यतेऽनेनेति । यज् + "अर्त्तिपृवपियजीति ।" उणा० २ । ११८ । इति उसिः ।) वेदविशेषः । इत्यमरः । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजुः । यजे ञौ देवार्च्चादानसङ्गतौ । चासुसिस् इति उस् ।" इति भरतः ॥ * ॥ अपि च । यजुराह जैमिनिः । शेषे वा यजुःशब्दः । शेषे ऋक्सामभिन्ने मन्त्रजाते तत्त्व यन्मन्त्रजातं प्रश्लिष्य पठितं गानादिविच्छेदरहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्व्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरकाः १ आह्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः ५ औपमन्याः ६ आष्टालकठाः ७ चारायणीयाः ८ वारायणीयाः ९ वार्त्तान्तवेयाः १० श्वेताश्वतराः ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवाः १ दुन्दुभाः २ चैकेयाः ३ वाराहाः ४ हारिद्रवेयाः ५ श्यामाः ६ श्यामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ शतम् । यजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि । तत्र प्राच्योदीच्यौ नैरृत्यौ निरृत्यः । तत्र वाजसनेया नाम सप्तदश भेदा भवन्ति । जाबालाः १ औधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ परमावटिकाः १० पाराशर्य्याः ११ वैधेयाः १२ वैनेयाः १३ औधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७ । प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ साङ्गलक्षणम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ श्राद्धकल्पः ७ प्रवराध्यायश्च ८ शाखम् ९ क्रतुः १० संख्या ११ अनुगमः १२ यज्ञम् १३ पार्श्वानः १४ होत्रकम् १५ पशवः १५ उक्थानि १७ कूर्म्मलक्षणम् १८ । इत्यष्टादशपरिशिष्टानि ।

"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सकलं सशुक्रियम् ॥
ग्रन्थांश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम् ।
आदावारभ्य वेदान्तं ब्रह्मयाहृतिपूर्व्वकम् ।
वेदमध्याय एतेवा होमान्ते तु समारभेत् ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्याः खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढ़ी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ । तत्र कठानामुपगानविशेषः । चतुश्चत्वारिंशदुपग्रन्थान् ।

"मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्व्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः ॥"

यजुर्व्वेदस्य धनुर्व्वेद उपवेदः । यजुर्व्वेदस्य भारद्वाजगोत्रम् । रुद्रदैवत्यम् । त्रैष्टुभं छन्दः । यजुर्व्वेदः कृशः । दीर्घः । कपाली । ताम्रवर्णः । काञ्चननयनः । आदित्यवर्णः वर्णेन । पञ्चारत्निमात्रः । अस्य ध्यानम् ।

"वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं रुक्मनेत्रं कृशाङ्गम् ।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालीनं पञ्च चारत्निमात्रम् ॥"

य इदं दैवतं रूपं गोत्रं प्रमाणं छन्दो वर्णं वर्णयति स विद्यां लभते स विद्यां लभते । जन्मजन्मनि वेदपारो भवति । जन्मजन्मनि वेदधारो भवति । अव्रतो व्रती भवति । अप्रयतः प्रयतो भवति । अब्रह्मचारी ब्रह्मचारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् ॥ (ऋक्सामभिन्नो मन्त्रविशेषः । इति केचित् ॥)

यजुर्व्वेदः, पुं, (यजुरेव वेदः । यजुषां वेद इति वा ।) वेदविशेषः । तस्याधिपतिर्यथा,—

"ऋग्वेदाधिपतिर्जीवः सामवेदाधिपः कुजः ।
यजुर्व्वेदाधिपः शुक्रः शशिजोऽथर्व्ववेदराट् ॥"
इति ज्योतिषम् ॥

अस्य वक्ता वैशम्पायनः । स तु आदावेक एवासीत् । यथा,—

"ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ॥
जैमिनं सामवेदस्य श्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ॥
एक आसीद्यजुर्व्वेदस्तञ्चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥"
इति कौर्म्मे ४९ अध्यायः ॥

यज्ञः, पुं, इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज् + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३।३।९० । इति नङ् ।) यागः । तत्पर्य्यायः । सवः २ अध्वरः ३ यागः ४ सप्ततन्तुः ५ मखः ६ क्रतुः ७ । इत्यमरः ।२।७।१३॥ इष्टिः ८ इष्टम् ९ वितानम् १० मन्युः ११ आहवः १२ सवनम् १३ हवः १४ अभिषवः १५ होमः १६ हवनम् १७ महः १८ । इति शब्दरत्नावली ॥ स त्रिविधः । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा,—

"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"

राजसिकयज्ञो यथा,—

"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥"

तामसिकयज्ञो यथा,—

"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥ * ॥

स च नानाविधः । यथा,—

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः शंसितव्रताः ॥"
इति श्रीभगवद्गीतायाम् ४ अध्यायः ॥ * ॥

पञ्च यज्ञा यथा,—

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इति गारुडे ११५ अध्यायः ॥ * ॥

(तथाच मनुः । ४ । २१—२२ ।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥"

अपरपञ्चयज्ञा उक्ता यथा, शिवपुराणे वायुसंहितायामुत्तरभागे । १८ । ८९—१०६ ।

"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥
कर्म्मयज्ञरताः केचित्तपोयज्ञरताः परे ।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥
कामान् कामी ततो भुक्त्वा कामासक्तः पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥
जपध्यानरतो भूत्वा जायते भुवि मानवः ।
जपध्यानरतो मर्त्यस्तद्वैशिष्ट्यवशादिह ॥
ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमाप्नुयात् ।
तस्मान्मुक्तौ शिवाज्ञप्तः कर्म्मयज्ञोऽपि देहिनाम् ॥
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ।
हिंसादिदोषनिर्मुक्तो विशुद्धश्चित्तसाधनः ॥
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
बहिः कर्म्मकरा यद्वन्नातीवफलभागिनः ॥
दृष्ट्वा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः ।
ध्यानिनां हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ॥
तथेह कर्म्मिणां स्थूलं मृत्काष्ठाद्यैः प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणमृण्मयान् ॥
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात् ।
आत्मस्थं यः शिवन्त्यक्त्वा बहिरभ्यर्च्चयेन्नरः ॥
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः ।
ज्ञानात् ध्यानं भवेत् ध्यानाज्ज्ञानं भूयः प्रवर्त्तते ॥
तदुभाभ्यां भवेन्मुक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादशान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ॥